ઓં સત્ગુરુભ્યો નમઃ

## શ્રી સોમસ્તોત્ર મહામન્ત્રં

અસ્ય શ્રી સોમ સ્તોત્ર મહામન્ત્રસ્ય
ગૌતમ ઋષિઃ અનુષ્ટુપ્ છન્દઃ
સોમદેવતા સોમપ્રીત્યર્ત્થે જપે વિનિયોગઃ

વાં અંગુષ્ટાભ્યાં નમઃ
વીં તર્જનીભ્યાં નમઃ
વૂં મદ્ધ્યમાભ્યાં નમઃ
વૈં અનામિકાભ્યાં નમઃ
વૌં કનિષ્ટિકાભ્યાં નમઃ
વઃ કરતલકરપૃષ્ટાભ્યાં નમઃ
વાં હૃદયાય નમઃ
વીં શિરસે સ્વાહા
વૂં શિખાયૈ વષટ્
વૈં કવચાય હૂં
વૌં નેત્રત્રયાય વૌષટ્
વઃ અસ્ત્રાયફટ્
ભૂર્ ભુવસ્સુવરોમિતિ દિગ્બન્ધઃ

## ધ્યાનં

શ્વેતાંબરો ટ જ્જ્વલતનું
સિતમાલ્યગન્ધં
શ્વેતાશ્વ યુક્તરથગં
સુરસેવિતાંઘ્રીં
દોર્ભ્યાં દ્રુતા ટ ભયગતં
વરદં સુધાંશું
શ્રીવત્સમૌક્તિકધરં

પ્રણમામિ ચન્દ્રં (1)

આગ્નેયભાગે સરતો દશશ્ચઃ
ચાત્રેયજો ચામુન દેશજશ્ચ
પ્રત્યંઙ્મુખસ્થઃ ચતુરશ્ચપીઠો
ગદાધરો ટવતુ રોહિણીશઃ (2)

ચન્દ્રં નમામિવરદં
શઙ્કરસ્ય વિભૂષણં
કલાનિધિં કાન્તરૂપં
કેયૂરમકુટોજ્જ્વલં (3)

વરદં વન્ધ્યચરણં
વાસુદેવસ્ય લોચનં
વસુધાહ્લાદનકરં
વિધું તં પ્રણમામ્યહં (4)

શ્વેતમાલ્યાંબરધરં
શ્વેતગન્ધાનુલેપનં
શ્વેતચ્છત્રોલ્લસન્મૌલિં
શશિનં પ્રણમામ્યહં (5)

સર્વ્વં જગજ્જીવયસિ
સુધારસમયૈઃ કરૈઃ
સોમ! દેહિમમારોગ્યં
સુધાપૂરિતમણ્ડલિ (6)

રાજાત્વં બ્રાહ્મણાનાઞ્ચ
રમાચા અપિસોદરઃ
રાજાનાથશ્ચૌષધીનાં
રક્ષમાં રજનીકરઃ (7)

શઙ્કરસ્ય શિરોરત્નં

શાર્ઙ્ગિગણસ્ય વિલોચનં
તારકાણામધીશસ્ત્વં
તારયાસ્માન્ મહાપદઃ (8)

કલ્યાણમૂર્ત્તે વરદઃ
કરુણારસ વારિધે
કલશોદધિસઞ્જાત
કલાનાથ કૃપાંકુરુ (9)

ક્ષીરાર્ણવ સમુદ્ભૂત
ચિન્તામણિ સહોત્ભવ
કામિતાર્ત્થાન્ પ્રદેહિ ત્વં
કલ્પદ્રુમસહોદર (10)

શ્વેતાંબર શ્વેતવિભૂષણાઢો
કલાધરઃ શ્વેતરુચિર્ દ્વિબાહુઃ
ચન્દ્રઃ સુધાત્મા વરદઃ કિરીટિ
શ્રેયાંસિમહ્યં પ્રદદાતુ દેવઃ (11)

ઈદં નિશાકરસ્તોત્રં યઃ પઠેદ્ પ્રત્યહં નરઃ
સ સર્વ્વરોગનિર્મુક્તઃ શતાયુસ્સુખમેધતેઃ

**શ્રી સોમસ્તોત્રં સમ્પૂર્ણં**